कुरुक्षेत्रस्थदेशभेदः सोऽभिजनोऽस्य अण् । तद्देश-वासिजने । तत्रत्यब्राह्मणभेदश्च "सारस्वताः कान्यकुब्जा गौडमैथिलकोत्कलाः । पञ्च गौड़ा इति ख्याता विन्ध्य-स्योत्तरवासिनः" पुराणान्तरम् ।

**सारस्वतकल्प** पु० कर्म० । १तन्त्रोक्ते सरस्वत्या उपासना-र्थके विधानभेदे २तन्नामके ब्रह्मदिने च । कल्पशब्दे १८१६ पृ० दृश्यम् । [शब्दर० २दूर्वायाञ्च शब्दच० ।

**सारा** स्त्री सारयति सृ-णिच्-अच् । १कृष्णत्रिवृतायाम्

**साराल** पु० सारमालाति आ+ला-क । तिलवृक्षे शब्दर० ।

**सारि(री)** पुंस्त्री० सृ-इण् स्त्रीत्वपक्षे वा ङीप् । १पाशके-''सारीं चरन्तीं सखि ! मारयेति'' नैषधम् । २पक्षि-भेदे च (शालिक) शब्दच० । ङीषन्तः ३सप्तलायां राजनि०

**सारिका** स्त्री सरति गच्छति सृ-ण्वुल् । पक्षिभेदे(शालिक) अमरः ।

**सारिणी** स्त्री सृ-णिनि । १सहदेवीलतायां २कार्पास्यां ३दुरालभायां ४कपिलशिंशपायां ५प्रसारिण्यां ६रक्त-पुनर्णवायाञ्च राजनि० ।

**सारिवा** स्त्री सारिरिव वाति वा-क । (अनन्तमूल)लताभेदे सा च दुग्धगर्भा जम्बुवत्पत्रा सुगन्धा च । सा च कृष्णशुक्लभेदात् द्विविधा "सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु । अग्निमान्द्यारुचिश्वासकासाम-विषनाशनम् । दोषत्रयास्रप्रदरज्वरातीसारनाशनम्" भावप्र० । [भवः ठक् । विषभेदे अमरः ।

**सारोष्ट्रिक** पु० सारः श्रेष्ठ उष्ट्रो यत्र सारोष्ट्रः देशभेदस्तत्र

**सार्थ** पु० सृ-थन् स्वार्थे अण् । १समूहे २जन्तुसमूहे अमरः ''स जयत्यरिसार्थसार्थकीकृतनामा'' नैषधम् । सह अर्थेन वाच्येन वा । ३वणिक्समूहे मेदि० । ४धनिनि त्रि० । कप् । सार्थक । ५अर्थसहिते त्रि० ६शब्दे पु० ''सार्थकः स्वार्थबोधकत्वादिति'' शब्दशक्तिप्रकाशिका ।

**सार्थवाह** पु० सार्थं वहति वह-अण् । वणिग्जने अमरः

**सार्द्र** त्रि० सह आर्द्रेण । आर्द्रतायुक्ते अमरः ।

**सार्द्धम्** अव्य० सह+ऋध-अमु । १साहित्ये अमरः । सह अर्द्धेन । सार्द्ध २अर्द्धयुक्ते त्रि० ।

**सार्प** न० सर्पो देवतास्य अण् । अश्लेषानक्षत्रे ।

**सार्पिष्क** त्रि० सर्पिषा संस्कृतम् ठक् । घृतसंस्कृते व्यञ्ज-नादौ हेमच० । [विदिते ।

**सार्वजनीन** त्रि० सर्वेषु जनेषु विदितः खञ् । सर्वलोक-

**सार्वत्रिक** त्रि० सर्वत्र भवः ठक् । सर्वस्मिन् कालादौ भवे ।

**सार्वधातुक** न० सर्वधातून् व्याप्नोति ठक् । व्याकरणोक्ते सर्वधातुप्रकृतिके लट् लोट लङ् विधिलिङ् इत्याख्यके चतुर्लकारे [दृद्धिः । सर्वभूतव्यापके ।

**सार्वभौतिक** त्रि० सर्वाणि भूतानि व्याप्नोति ठञ् द्विपद-

**सार्वभौम** पु० सर्वस्या भूमेरीश्वरः सर्वासु भूमिषु विदितो वा अण् द्विपदवृद्धिः । १चक्रवर्तिनि नृपे २उत्तरदिक्स्थे गजे च अमरः । ३विदूरथन्नृपपुत्रे पु० भाग० ९।२८अ० । ४सकलभूमिसम्बन्धे त्रि० ।

**सार्वलौकिक** त्रि० सर्वेषु लोकेषु विदितः ठञ् द्विपदवृद्धिः । सर्वत्रलोकेषु विदिते ''स रामः सार्वलौकिकः'' भट्टिः ।

**सार्वविभक्तिक** त्रि० सर्वासु विभक्तिषु तदर्थे भवः-ठञ् । सर्वविभक्त्यर्थे विहिते तसिलादौ प्रत्यये पा० ।

**सार्षप** त्रि० सर्षपस्य विकारः अण् । सर्षपविकारतैलादौ ''अदुष्टं सार्षपं तैलम्'' स्मृतिः ।

**साल** पु० सल-घञ् । १वृक्षमात्रे "रसालसालः समदृश्य-तामुना" नैषधम् । २स्वनामख्याते वृक्षभेदे ''सालस्तु सर्ज-कार्य्याश्वकर्णकः सस्यसंवरः । अश्वकर्णः कषायः स्यात् व्रणस्वेदकफक्रमीन् । भग्नविद्रधिबाधिर्य्ययोनिकर्ण-गदान् हरेत् । सर्जकोऽन्योऽजकर्णः स्यात् सालो मरिच-पत्रकः । अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति । कफपाण्डुश्रुतिगदान् मेहकुष्ठविषव्रणान्'' भावप्र० । एतत्परत्वे तालव्यादितापि । ३प्राकारे मेदि० ४साल-मत्स्ये भरतः ५राले राजनि० ।

**सालन** पु० सालः कारणत्वेनाऽस्त्यस्य पामादित्वात् न । सालनिर्य्यासे (धुना) रत्नमा० ।

**सालनिर्य्यास** पु० ६त० । सर्जरसे (धुना) रत्नमा० ।

**सालपर्णी** स्त्री सालस्येव पर्णान्यस्याः ङीप् । (सालपानि) वृक्षे शब्दर० ।

**सालपुष्प** न० सालस्येव पुष्पं यस्य । स्थलपद्मे शब्दर० ।

**सालभञ्जिका** स्त्री सालं भनक्ति भञ्ज-ण्वुल् । १काष्ठादि-निर्मिते क्रीडासाधने पुत्तलिकाभेदे २वेश्यायाञ्च जटा० ।

**सालरस** पु० ६त० । (धुना) राले राजनि० ।

**सालवेष्ट** पु० सालं वेष्टयति वेष्ट-अण् । राले (धुना)राजनि०

**सा(शा)ला** स्त्री सालः प्राकारोऽस्त्यस्याः अच् । गृहे भरतः

**सा(शा)लावृक** पुंस्त्री० सालायां वृक इव । कुक्कुरे । स्त्रियां ङीष् । [शब्दर० स्त्रियां ङीष् ।

**सा(शा)लूर** पुंस्त्री० स(श)ल-ऊरच् णिच्च । भेके मण्डूके